# ॥ लक्ष्मीनारायणाष्टोत्तरशतनामस्तोत्रम् ॥

श्रीर्विष्णुः कमला शार्ङ्गी लक्ष्मीर्वैकुण्ठनायकः।
पद्मालया चतुर्बाहुः क्षीराब्धितनयाऽच्युतः ॥ १ ॥

इन्दिरा पुण्डरीकाक्षो रमा गरुडवाहनः।
भार्गवी शेषपर्यङ्को विशालाक्षी जनार्दनः ॥ २ ॥

स्वर्णाङ्गी वरदो देवी हरिरिन्दुमुखी प्रभुः।
सुन्दरी नरकध्वंसी लोकमाता मुरान्तकः ॥ ३ ॥

भक्तप्रिया दानवारिरम्बिका मधुसूदनः।
वैष्णवी देवकीपुत्रो रुक्मिणी केशिमर्दनः ॥ ४ ॥

वरलक्ष्मी जगन्नाथः कीरवाणी हलायुधः।
नित्या सत्यव्रतो गौरी शौरिः कान्ता सुरेश्वरः ॥ ५ ॥

नारायणी हृषीकेशः पद्महस्ता त्रिविक्रमः।
माधवी पद्मनाभश्च स्वर्णवर्णा निरीश्वरः ॥ ६ ॥

सती पीताम्बरः शान्ता वनमाली क्षमाऽनघः।
जयप्रदा बलिध्वंसी वसुधा पुरुषोत्तमः ॥ ७ ॥

राज्यप्रदाऽखिलाधारो माया कंसविदारणः।
महेश्वरी महादेवो परमा पुण्यविग्रहः ॥ ८ ॥

रमा मुकुन्दः सुमुखी मुचुकुन्दवरप्रदः।
वेदवेद्याऽब्धि-जामाता सुरूपाऽर्केन्दुलोचनः ॥ ९ ॥

पुण्याङ्गना पुण्यपादो पावनी पुण्यकीर्तनः।
विश्वप्रिया विश्वनाथो वाग्रूपी वासवानुजः ॥ १० ॥

सरस्वती स्वर्णगर्भो गायत्री गोपिकाप्रियः।
यज्ञरूपा यज्ञभोक्ता भक्ताभीष्टप्रदा गुरुः ॥ ११ ॥

स्तोत्रक्रिया स्तोत्रकारः सुकुमारी सवर्णकः।
मानिनी मन्दरधरो सावित्री जन्मवर्जितः ॥ १२ ॥

मन्त्रगोप्त्री महेष्वासो योगिनी योगवल्लभः।
जयप्रदा जयकरो रक्षित्री सर्वरक्षकः ॥ १३ ॥

अष्टोत्तरशतं नाम्नां लक्ष्म्या नारायणस्य च।
यः पठेत् प्रातरुत्थाय सर्वदा विजयी भवेत् ॥ १४ ॥

॥ इति श्री-लक्ष्मीनारायणाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Lakshmi_Narayana_Ashtottara_Shatanama_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits